# श्री कृष्ण चारित्र्यमंजरी

विष्णुब्रह्मादिदेवैः क्षितिभरहरणे प्रार्थितः प्रादुरासीद्
देवक्यां नंदनंदी शिशुवधविहितां पूतनां यो जघान ।
उत्थानौत्सुक्यकाले रथचरणगतं चासुरं पादघातै–
श्चक्रावर्तं च मात्रा गुरुरिति निहितो भूतले सोऽवतान्मान् ॥ १ ॥

यो मातुर्जृंभमाणो जगदिदमुखिलं दर्शयन्नंकरूढो
गर्गेणाचीर्णनामा कृतरुचिरमहाबाललीलो वयस्यैः ।
गोपीगेहेषु भांडस्थितमुरुदयया क्षीरदध्यादि मुष्णन्
मृन्मा भक्षीति मातुः स्ववदनगजगद्भासयन् भासतां मे ॥ २ ॥

दध्नो मत्रस्य भंगादुपगमितरुषा नंदपत्न्याथ बद्धः
कृच्छ्रीणोलूखले यो धनपतितनयौ मोचयामास शापात् ।
नंदाद्यैः प्राप्य वृंदावनमिह रमयन् वेणुनादादिभिर्यो
वत्सान् पान् वत्सरूपं क्रतुभुगरिमथो पोथयन्नोऽवतान्माम्॥ ३ ॥

रक्षन् वत्सान् वयस्यैर्बकमभिनदथो तिग्मतुंडे गृहीत्वा
प्रीतिं कर्तुं सखीनां खरमपि बलतो घातयन् कालियाहिम् ।
उन्मथ्योद्वास्य कृष्णामतिविमलजलां यो व्यधाद्दाववह्निं
सुप्तानावृत्य गोष्ठे स्थितमपिबदसौ दुष्टवृक्षच्चिदव्यात् ॥ ४ ॥

दुर्गारण्यप्रवेशाच्च्युतनिजसरणीन् गोगणानाह्वयद्यो
दावाग्निं तत्र पीत्वासमपुषदनुगान् गोपकानाविषण्णान् ।
गोभिर्गोपैः परीतः सरिदुदकतटस्थोपले भोज्यमन्नं
भुक्त्वावेणोर्निनादाद्व्रजगतवनिताचित्तहारी स माऽव्यात् ॥ ५ ॥

कृष्णोऽस्माकं पतिः स्यादिति कृततपसां मज्जने गोपिकानां
नग्नानां वस्त्रदाता द्विजवरवनितानीतमन्नं समश्नन् ।
श्रांतैर्गोपैः समं यो बलमथनबलवाहृते स्मिन्ऽसवृष्ठौ
प्रोद्धृत्याहार्यवर्यं निजजनमखिलं पालयन् पात्वसौ माम् ॥ ६ ॥

गोविंदाख्योऽथ तातं जलपतिहृतमानीय लोकं स्वकीयं
नंदादीनां प्रदर्श्य व्रजगतवनितागानकृष्टार्तचित्ताः ।
यः कालिंद्यां निशायामरमयदमलज्योत्स्नया दीपितायां
चार्वंगीर्नर्मवाक्यैः स्तनभरनमिताः प्रीणयन् प्रीयतां नः ॥ ७ ॥

अंतर्धत्ते स्म तासां मदहरणकृते त्वेकया क्रीडमानः
स्वस्यंधारोहणाद्यैः पुनरपि विहितो गर्वशांत्यै मृगाक्ष्याः ।
खिन्नानां गोपिकानां बहुविधनुतिभिर्यो वहन् प्रीतिमाविः –
प्राप्तो रासोत्सवेन न्यरमयदबलाः प्रीयतां मे हरिः सः ॥ ८ ॥

हत्वा यः शंखचूडं मणिमथ समदादग्रजायार्तगोपी–
गीतानेकस्वलीलो हतवृषभमहापूर्वदेवोमरेड्यः ।
केशिप्राणापहारी सुरमुनिवदनप्रार्थिताशेषकृत्यो
हत्वा पुत्रं मयस्य स्वजनमपिहितं मोचयन् मोक्षदः स्यात्॥९॥

अक्रूराकारितो यान् व्रजयुवतिजनान् सांत्वयित्वाभितप्तान्
स्वं रूपं मज्जते स्मै विलसितमहिगं दर्शयंस्तेन वंद्यः।
यो गत्वा कंसधानीं कृतरजकशिराश्चारुवेषः सुधाम्नः
प्रीतिं कुर्वंस्त्रिवक्रां व्यतनुत रुचिरां पौरमह्योऽवतात् सः॥ १० ॥

शार्वं भंक्त्वा धनुर्यो बलमपि धनुषो रक्षकं कुंजरं तं
मल्लांश्चाणूरपूर्वानपि सहसहजो मर्दयंस्तुंगमंचात् ।
भोजेशं पातयित्वा व्यसुमकृत निजान् नंदयन् प्राप्य गर्गात्
द्विजं संस्कारमाप्तो गुरुमथ विदिताशेषविद्योऽवतान्नः ॥ ११ ॥

दत्वा पुत्रं प्रवक्त्रे प्रतिगतमधुरः सांत्वयन्नुद्धवास्या–
द्गोष्ठस्थान् नंदपूर्वानरमयदबलाप्रीतिकृद्यः शुभस्य ।
अक्रूरस्याथ तेन प्रतिविदिपृथातापुत्रकृत्यो जरायाः
सूनुं निर्भिन्नसेनं व्यतनुत बहुशो विद्रुतं नः स पयात् ॥ १२ ॥

पुर्या निर्गत्य रामादथ सहमुसली प्राप्य कृष्णोभ्यनुज्ञां
गोमंतं चापि मौलिं खगपतिविहितां वासुदेवं सृगालम् ।
हत्वा शत्रुं च पुर्यामधिजलधि पुरीं निर्मितां बंधुवर्गान्
निन्ये यः सो वतान्नाः प्रमथितयवनो मौचुकुंदाक्षिवह्नेः ॥ १३ ॥

राज्ञा संस्तूयमानो हतयवनबलो भीतवन्मागधेशाद्
गोमंतं प्राप्य भूयो जितमगधपतिर्जातशांताग्निशैलः ।
आगत्य द्वारकां यो ह्यदिकसुतगिरा ज्ञातकौंतेयकृत्यः
पश्यत्स्वादायभृष्मी नृषु युधि जितवान् भूभृतः प्रीयतां नः॥१४॥

वैरूप्यं रुग्मिणो यो कृत मणिसहितं जांबवद्देहजातां
सत्यां तेनैव युक्तामपि परिजगृहे हस्तिनं कुल्यहेतोः ।
यातो व्यस्यात्र सत्याशुचमथ समगाद्द्वारकां सत्ययेतो
दृष्टुं पार्थान् सकृष्टान् द्रुपदपुरमगाद्विद्धलक्ष्मान् स पायात्॥१५॥

कृष्णः प्राप्याथ सत्राजिदहितवधकृद्यः श्वफल्कस्य सूनौ
रत्नं संदर्श्य रामं व्यधित गतरुषं द्रष्टुकामः प्रतस्थे ।
इंद्रप्रस्थस्थपार्थानथ सहविजयो यामुनं तीरमायन्
कालिंदीं तत्र लब्ध्वा यमसुतपुरकृत् पातुमां द्वारका स्थः ॥१६॥

यो जह्रे मित्रविंदामथ दृढवृषभान् सप्तबद्ध्यापि नीलां
भद्रां मद्रेशकन्यामपि परिजगृहे शक्रविज्ञापितार्थः ।
ताक्ष्यान् रूढः सभार्यो हिमगिरिशिखरे भौमदुर्गं समेस्य
छित्वा दुर्गाणि कृंत्वा मुरगलमरिणा देवतेड्यः स माऽव्यात्॥१७॥

त्रिंशत्पंचावधीद्यः सचिववरसुतान् भूमिजेनातिघोरं
युद्धं कृत्वा गजाद्यैर्हरिहृतशिरसं तं व्यदाद्भूस्तुतोऽथ ।
कृत्वा राज्येऽस्य सूनुं वरयुवतिजनान् भूरिशश्चारुवेषान्
प्रापय्य द्वारकां सो कृत मुदमदिते कुंडलाभ्यामवेन्माम् ॥१८॥

इंद्राराध्योमरेंद्रप्रियतममगमाहृत्य देवान् विजित्य
प्राप्याथ द्वारकां यः सुतमतिरुचिरं रुग्मिणीशः प्रपेदे ।
भ्रातृव्यं पौंड्रकाख्यं पुररुधमतनोत् कृत्तशीर्षं तदीया–
पत्योत्पन्नां च कृत्यां रथचरणरुचा कालयन् कामधुक् स्यात्॥१९॥

कृष्णः सूर्योपरागे निजयुवतिगणैर्भार्गवं क्षेत्रमाप्त–
स्तत्रायातान् स्वबंधून् मुनिगणमपि संतोष्य यज्ञं स्वपित्रा ।
योऽनुष्ठाप्याथ नैजं पुरमथ वदितानेकतत्त्वानि पित्रे
मातुः पुत्रान् प्रदश्याकृत हितमहितं मे पनुद्यात् स ईशः॥२०॥

रुग्मिण्या नर्मवाक्यैररमत बहुभिः स्त्रीजनैर्योथ पुत्रा–
नेकैकस्यां प्रपद्य दश दश रुचिरान् पौत्रकानप्यनेकान् ।
पौत्रस्योद्वाहकाले भृहकुपितबलाद्रुग्मिणं घातयित्वा
नंदन् योषिद्गणेन प्रतिग्रहमबलाप्रीतिकारी गरिर्मे ॥ २१ ॥

नानारत्नप्रदीप्तासमविभवयुतद्व्यष्टसाहस्रकांता–
गेहेष्वश्नन् शयानः क्व च जपमृगयादीनी कुर्वन्  क्वचिच्च ।
दीव्यन्नक्षैर्ब्रुवाणः प्रवचनमपरैर्मंत्रयन्नेवमादि–
व्यापारान् नारदस्य प्रतिसदनमहो दर्शयन् नः स पायात् ॥२२॥

प्रातर्ध्यायन् प्रसन्नः कृतिनिजविहितः सत्सभां प्राप्य कृष्णो
दूतं राज्ञां प्रतोष्यामरमुनिविदिताशेषकृत्यः प्रयासीत् ।
शक्रप्रस्थं चमूभिर्बहुविभवयुतं बंधुभिर्मानितोयं
भीमेनापात्य बार्हद्रथमथ नृपतीन मोचयन् मे प्रसीदेत् ॥ २३ ॥

पुत्रं राज्येस्य कृत्वा हतशिरसमथो चेदिराजं विधाय
प्रोद्यंतं राजसूयं यमसुतविहितं संस्थितं यो विधाय ।
शक्रप्रस्थात् प्रयातो निजनगरमसौ साल्वभंगं समीक्ष्य
कव्धोघ्नन्नब्धिगं तं शिववरबलिनं यान् पुरं पातुनित्यम् ॥ २४ ॥

विप्रादाकर्ण्य धर्मं वनगतमनुजैः सांतयित्वैत्यसर्वा-
नभ्येत्य द्वारकां यो नृगमथ कुजनिं दिव्यरूपं चकार ।
गत्वा वैदेहगेहं कतिपयदिवसांस्तत्र नीत्वातिभक्तं
संतोष्य द्वारकां यान् बहुबलसमितो यन्नुपप्लाव्यमव्यात्॥ २५ ॥

दौत्य कुर्वन्ननंता निजरुचिरतनूर्दर्शयन् दिव्यदृष्टे-
र्गीतातत्त्वोपदेशाद्रणमुखविजयस्याचरन् सारथित्वम् ।
नीत्वा कैलासमेनं पशुपतिमुखतो दापयित्वास्त्रमस्मै
भीमेनापात्य दुष्टं क्षितिपतिमकरोद्धर्मराजं तमीडे ॥ २६ ॥

प्राप्तः स्थानं यदूनां प्रियसखमकृतावाप्तकामं कुचेलं
कुर्वन् कर्माश्वमेधं निजभवनमथो दर्शयित्वार्जुनाय ।
पुत्रान् विप्राय दत्वासहसजमसौ दंतवक्रं निपात्य
प्राप्याथ द्वारतां स्वां समवतु विहरन्नुद्धवायोक्ततत्त्वः ॥ २७ ॥

रक्षन् लोकान् समस्तान् निजजननयनानंदकारी निरस्ता-
वद्यः सौख्यैकमूर्तिः सुरतरुकुसुमैः कीर्यमाणोऽमरेंद्रैः ।
सिद्धैर्गंधर्वपूर्वैर्जयजयवचनैः स्तूयमानोऽत्र कृष्णः
स्त्रीभिः पुत्रैश्च पौत्रैः स जयति भगवान् सर्वसंपत्समृद्धः॥२८॥

॥ इति श्री कृष्णचारित्रमंजरी लेशतः कृता ।
राघवेंद्रेण यतिना भूयात् कृष्णप्रसाददा ॥ २९ ॥

॥  इति श्री राघवेंद्रतीर्थकृत श्रीकृष्णचारित्र्यमंजरी ॥